
9
नवमः पाठः

# सुभाषितावली

भूमेः गरीयसी माता, स्वर्गात् उच्चतरः पिता
जननी जन्मभूमिश्च, स्वर्गादपि गरीयसी ।



यत्–यत् परवशं कर्म, तत्–तत् यत्नेन वर्जयेत्
यत्–यत् आत्मवशं तु स्यात् तत्–तत् सेवेत यत्नतः ।

रक्तं धनं च देशाय संकटे यः प्रयच्छति ।
यज्ञानां सः सहस्रस्य फलं विन्दति सर्वथा ।।

जाड्यं धियो हरति सिञ्चति वाचि सत्यम्
मानोन्नतिं दिशति पापमपाकरोति
चेतः प्रसादयति दिक्षु तनोति कीर्तिं,
सत्संगतिः कथय किं न करोति पुंसाम् ।।

## 'तद्' = (वह) पुल्लिंग (MASCULINE WORD)

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | सः | तौ | ते |
| द्वितीया | तम् | तौ | तान् |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पंचमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |